# nArAyaNastotram

# નારાયણસ્તોત્રમ્

## Document Information

Text title : nArAyaNastotram 1

File name : naaraayanastotra.itx

Category : vishhnu, narayana, stotra, shankarAchArya, vishnu

Location : doc_vishhnu

Author : ShankarAchArya

Proofread by : Ravin Bhalekar ravibhalekar at hotmail.com

Latest update : April 15, 2018

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 17, 2023

*sanskritdocuments.org*

# નારાયણસ્તોત્રમ્

શ્રી ગણેશાય નમઃ ।
નારાયણ નારાયણ જય ગોવિન્દ હરે ॥

નારાયણ નારાયણ જય ગોપાલ હરે ॥ ધ્રુ ॥

કરુણાપારાવાર વરુણાલયગમ્ભીર ॥ નારાયણ ॥ ૧॥

ઘનનીરદસઙ્કાશ કૃતકલિકલ્મષનાશ ॥ નારાયણ ॥ ૨॥ (નવનીરદસઙ્કાશ)

યમુનાતીરવિહાર ધૃતકૌસ્તુભમણિહાર ॥ નારાયણ ॥ ૩॥

પીતામ્બરપરિધાન સુરકલ્યાણનિધાન ॥ નારાયણ ॥ ૪॥

મઞ્જુલગુઞ્જાભૂષ માયામાનુષવેષ ॥ નારાયણ ॥ ૫॥

રાધાધરમધુરસિક રજનીકરકુલતિલક ॥ નારાયણ ॥ ૬॥

મુરલીગાનવિનોદ વેદસ્તુતભૂપાદ ॥ નારાયણ ॥ ૭॥

બર્હિનિબર્હાપીડ નટનાટકફણિક્રીડ ॥ નારાયણ ॥ ૮॥

વારિજભૂષાભરણ રાજીવરુક્મિણીરમણ ॥ નારાયણ ॥ ૯॥

જલરુહદલનિભનેત્ર જગદારમ્ભકસૂત્ર ॥ નારાયણ ॥ ૧૦॥

પાતકરજનીસંહાર કરુણાલય મામુદ્ધર ॥ નારાયણ ॥ ૧૧॥

અઘબકક્ષયકંસારે કેશવ કૃષ્ણ મુરારે ॥ નારાયણ ॥ ૧૨॥

હાટકનિભપીતામ્બર અભયં કુરુ મે માવર ॥ નારાયણ ॥ ૧૩॥

દશરથરાજકુમાર દાનવમદસંહાર ॥ નારાયણ ॥ ૧૪॥

ગોવર્ધનગિરિરમણ ગોપીમાનસહરણ ॥ નારાયણ ॥ ૧૫॥

શરયૂતીરવિહાર સજ્જનઋષિમન્દાર ॥ નારાયણ ॥ ૧૬॥

વિશ્વામિત્રમખત્ર વિવિધપરાસુચરિત્ર ॥ નારાયણ ॥ ૧૭॥

ધ્વજવજ્રાઙ્કુશપાદ ધરણીસુતસહમોદ ॥ નારાયણ ॥ ૧૮॥

જનકસુતાપ્રતિપાલ જય જય સંસ્મૃતિલીલ ॥ નારાયણ ॥ ૧૯॥

દશરથવાગ્ધૃતિભાર દણ્ડકવનસઞ્ચાર ॥ નારાયણ ॥ ૨૦॥

મુષ્ટિકચાણૂરસંહાર મુનિમાનસવિહાર ॥ નારાયણ ॥ ૨૧॥

વાલિવિનિગ્રહશૌર્ય વરસુગ્રીવહિતાર્ય ॥ નારાયણ ॥ ૨૨॥ વાલીનિગ્રહ

માં મુરલીકર ધીવર પાલય પાલય શ્રીધર ॥ નારાયણ ॥ ૨૩॥

જલનિધિબન્ધનધીર રાવણકણ્ઠવિદાર ॥ નારાયણ ॥ ૨૪॥

તાટીમદદલનાઢ્ય નટગુણવિવિધધનાઢ્ય ॥ નારાયણ ॥ ૨૫॥ (તાટકમર્દનરામ)

ગૌતમપત્નીપૂજન કરુણાઘનાવલોકન ॥ નારાયણ ॥ ૨૬॥

સમ્ભ્રમસીતાહાર સાકેતપુરવિહાર ॥ નારાયણ ॥ ૨૭॥

અચલોદ્ધૃતિચઞ્ચત્કર ભક્તાનુગ્રહતત્પર ॥ નારાયણ ॥ ૨૮॥

નૈગમગાનવિનોદ રક્ષઃસુતપ્રહ્લાદ ॥ નારાયણ ॥ ૨૯॥ રક્ષિત સુપ્રહ્લાદ

ભારતીયતિવરશઙ્કર નામામૃતમખિલાન્તર ॥ નારાયણ ॥ ૩૦॥

। ઇતિ શ્રીમચ્છઙ્કરાચાર્યવિરચિતં નારાયણસ્તોત્રં સમ્પૂર્ણમ્ ।

There are two variations found as mentioned
on the right side of verses 22 and 29.
Also, although it is commonly attributed to Shankaracharya,
the author is mentioned as Shankarabharatiyati that we
could not verify as Shankaracharya.

Proofread by Ravin Bhalekar ravibhalekar@hotmail.com

*nArAyaNastotram*

pdf was typeset on September 17, 2023

Please send corrections to *sanskrit@cheerful.com*